भूमिजा तिहारो पाँव टेकि कहौं बार बार
पति को गुलाम जानि काहे बिसरावती।
हे री जगदम्ब अवलम्ब एक तैंही मेरी
काहे निज नाह तें न बाँह पकरावती।।६।।

अधमोद्धार-सत्कीर्त्ती रुचिरा तव राजते
उत्पथं स्वजनं मातः सत्पथं द्राङ् निनीषसि।।६.१।।

प्रगाय ते यशोऽनेके संसाराब्धिमतीतरन्
प्रतीपा इह येऽनेके विशोकास्तेऽपि शेरते।।६.२।।

अथ सीते पदौ नत्वा वारं वारं निवेदये
ज्ञात्वाऽपि किङ्करं पत्युः किङ्कृते विस्मृताऽसि माम्।।६.३।।

जगदम्बे त्वमेवासि मम नित्यावलम्बनम्
किं न ग्राहयसे पाणिं मदीयं शार्ङ्गपाणिना।।६.४।।

छार को सँवारि तूँ पहारहू ते भारी करै
सरिस पहार को उड़ावै करि छार है।
रंक को नेवाजि पुरहूतहू ते ऊँचो करै
सरिस पुरन्दर फिरावै द्वार द्वार है।।
भ्रुकुटी विलास ते जगत उपजावै तैही
पालै फिरि नाशत न लागै नेक वार है।
अक्षत प्रताप तेरे राम को गुलाम द्विज
संकट परे ते द्वार करत पुकार है।।७।।

गिरेरपि गरीयान् स्यात् त्वया स्पृष्टो रजःकणः
उद्धूयते गिरीन्द्रोऽपि देवि धूलीकृतस्त्वया।।७.१।।

कृपापात्रीकृतो रङ्कः पुरुहूतप्रभुर्भवेत्
इन्द्रोऽपि चान्यथा भिक्षुर्द्वाराद् द्वारं प्रपद्यते।।७.२।।

जगत् संसृज्यते देवि त्वया भृकुटिलीलया
पाल्यते तदिदं किञ्च निमेषेण विनाश्यते।।७.३।।

त्वमक्षतप्रतापाऽसि क्षतोऽयं रामकिङ्करः
देहल्यां पतितस्त्राणं याचते दुःखितो द्विजः।।७.४।।

छप्पय

मधु कैटभ को मोहि विष्णु कर ते बधवायो।
शरणागत मुखचारि तासु को प्राण बचायो।।
मारि सदल महिषेश सुरन को सुखित बसायो।
शुम्भ निशुम्भ बिदारि सुरन को वचन सुनायौ।।
जब जब संकट होय तुम तब तब मम सुमिरण करहु।
तब तव दुष्टन मारि कै सब विधि मैं रक्षा करहुँ।।८।।

मधुकैटभयोर्मोहं विधाय हरिणा वधम्
चारुचक्रकरेणाम्बा भवती समचीकरत्।।८.१।।

चतुर्भिरास्यैः क्रोशन्तं ब्रह्माणं शरणागतम्
अभयं प्राणभिक्षाञ्च भवती तरसा ददौ।।८.२।।

ससैन्यो निहतो देव्या मायावी महिषासुरः
कृताश्च सुखिनो भूयः स्वर्गनिर्वासिताः सुराः।।८.३।।

दैत्याधिराजं शुम्भञ्च निशुम्भं तत्सहोदरम्
निहत्य जननी देवानाश्वासितवती स्वयम्।।८.४।।

यदा यदा भवेद् बाधा यूयं स्मरत मां द्रुतम्
साऽहं दुष्टान् निहत्याजौ करिष्ये वः सुरक्षणम्।।८.५।।

सवैया

आजु लौं ऐसी भई न कहूँ
सुरपादप के तर दारिद आवै।
सावन के बन की सबुजी
घन देखत दीह दवारि जरावै।।
श्री जगदम्ब सुनो विनती
द्विज रामगुलाम गोहारि लगावै।
अक्षत बाहुबली बिरुदैत
विलोकत तोहि को मोंहि सतावै।।९।।

कदापि लक्षितं दैन्यं नैव कल्पतरोस्तले
मेघे पश्यति वर्षाणां कुत्र दग्धं नु काननम्।।९.१।।

क्रन्दत्येष जगन्मात:शृणु रामस्य किङ्कर:
ईश्वर्यां त्वयि पश्यन्त्यां कोऽयं त्रासप्रदो भवेत्।।९.२।।

गान करौं तिहरो यश पावन
बाज बजाइ कै प्रेम बढ़ावौं।
नाम जपौं निशिवासर तेरइ
ध्यान धरौं तव दास कहावौं।।
तेरइ आस भरोसो है तेरइ
तेरेइ द्वार पुकार लगावौं।
तू जननी जनि छोह तजै
बलि आरत ह्वै तोंहि शीश नवावौं।।१०।।

गायामि ते यशः पुण्यं वाद्यरागानुरञ्जितम्
जपामि नाम-मालां ते भक्तस्तव च सम्मतः।।१०.१।।

त्वयि सम्भावना-निष्ठा ते द्वारे चाह्वयाम्यहम्
वात्सल्यं त्यज मा मातर्नौमि पीडासमन्वितः।।१०.२।।

कौरव क्रूर कुबुद्धि को ठानि
हरी जिमि पारथ की सब साजू।
मान्यो नहीं कहे कृष्णहु के
विदुरै करि दूर भये महराजू।।
दीन दुखी सुत पांडव के
सहि संकट शांति गहे तजि लाजू।
श्री यदुवीर सहायक भे
हति दुष्टन दीन अकंटक राजू।।११।।

पार्थानां दायमादाय यथा ते क्रूरकौरवाः
विदुरं वासुदेवञ्च न्यक्कृत्य नृपतां गताः।।११.१।।

चिराय पाण्डुपुत्रैश्च भ्रमद्भिर्दुःखभागिभिः
कृष्णयुक्त्या रिपुध्वंसात् प्राप्तं राज्यमकण्टकम्।।११.२।।

तैसहि ए सब क्रूर कुबुद्धिन
भाग हमार हर्‍यो छल ठानी।
पंचहु के कहे मान्यो नहीं
मोंहि वृद्ध अकिंचन आरत जानी।।
श्री जगदम्ब सुनो विनती
शरणागत-पालिनि वांछितदानी।
कीजै सहाय विलम्ब विहाय कै
रामगुलामहिं किंकर मानी।।१२।।

तथा दीनस्य दायांशो ममैभि: क्रूरबुद्धिभि:
कपटेन हृत: किञ्च पञ्चन्यायोऽवहेलित:।।१२.१।।

शृणुष्व प्रार्थनाम्बे शरणागतसंश्रये
साहाय्यं सत्वरं देहि मत्वा मां स्वीयसेवकम्।।१२.२।।

कवित्त

शंख चक्र गदा शक्ति लांगल मुशल खेट
तोमर परसु पास कुंत को सँवारे है।
नाशक असुर दल शूल औ सारंग धनु
बारह भुजनवर आयुध को धारे है।।
भक्तन के पालन को दुष्टन के घालन को
सदा सब ठौर वेद शास्त्रन उचारे है।
उद्यत रहत वसुयाम जगदम्ब तेरे
अक्षत प्रताप मेरी सुरति बिसारे है।।१३।।

वेदाः शास्त्राणि भाषन्ते शस्त्राली ते समुद्यता
जनावनाय दुष्टानां विनाशाय च राजते।।१३.१।।

शङ्खचक्रे गदा शक्तिर्लाङ्गलं मुशलं तथा
खेटश्च तोमरं पाशः परशुः कुन्त एव च।।१३.२।।

शूलं शार्ङ्गधनुस्तीव्रं भुजद्वादशके क्रमात्
तथापि न स्मृतः केन जनो जननि हेतुना।।१३.३।।

सवैया

सिंह बुढ़ान न बाँण सिरान
न आयुध हाँथन में कमती है।
जोर घट्यो नहिं बाँहुन को
नहिं आपन बानिहुँ को तजती है।
साँसति संकट घोर सहै जन
क्यों नहिं चित्त दया धरती है।
रामगुलाम पुकार करै
जगदम्ब विलम्ब कहा करती है।।१४।।

न ते वृद्धोऽभवत् सिंहो बाणा नैव क्षयं गताः
नाल्पा भुजेषु शस्त्राली शक्तिर्नैव च कुण्ठिता।।१४.१।।

विसृष्टा न त्वया मातः काऽपि वृत्तिः पुरातनी
तत् किं जने विषण्णेऽस्मिन् मनसा नानुकम्पसे।।१४.२।।

अयं वेदयते देवि क्रन्दन् राघवसेवकः
मत्सन्दर्भे कथङ्कारं जगदम्बे विलम्बसे।।१४.३।।

ऊरध केश भयावन आनन
दन्त कढ़े रसना अति लाली।
हाँथ में खप्पर खड्ग लिए
गर मुण्ड को माल सदा जन पाली।।
बैरिन को गहि ग्रीव मरोरि
पियै शुचि श्रोणित दौरि उताली।
राम गुलामहिं रक्षै सदा
करिकै अरि को मदगंजन काली।।१५।।

ऊर्ध्वकेशं स्फुरद्दन्तं निर्गलद्रसनार्द्धकम्
अरिभ्यो भयदं भाति जगन्मातस्तवाननम्।।१५.१।।

हस्तयोः कर्परं खड्गं गलाग्रे मुण्डमालिकाम्
दधाना तनुषे शश्वद् भक्तानामवनं शिवे।।१५.२।।

निगृह्य रभसं शत्रून् भङ्क्त्वा तेषां शिरोधराः
धावन्ती शोणिताचान्तिं कुरुषे जगदम्बिके।।१५.३।।

चूर्णतां नय हे कालि रिपूणां मद-विस्तरम्
सीतानाथविधेयोऽयं रक्षणीयश्च सत्वरम्।।१५.४।।

कवित्त

वदन विशाल विकराल नैन लाल लाल
दशन कराल गर मुण्डन की मालिका।
केश घुँघरारे लाल रसना पसारे
अति घोर बपु धारे सदा दासन की पालिका।।
मारि मारि खड्ग ते गिरावै सीस शत्रुन को
शक्तिन समेत खेलै गेंद ज्यों उछालिका।
सुवन समान रिपु भीति से बचावै सदा
राम के गुलाम की सहाय मातु कालिका।।१६।।

विशालमाननं देवि कराले शोणलोचने
गले ते मुण्डमालाऽऽस्ते विकराला रदावली।।१६.१।।

कुञ्चितः केशविन्यासो रसना स्फीतशोणिता
घोरकायधरे मातः कुरुषे लोकपालनम्।।१६.२।।

शत्रुशीर्षाणि कृन्तन्ती करवाल-प्रहारतः
क्रीडन्ती कन्दुकीकृत्य तानि शक्तिभिरन्विता।।१६.३।।

तनयीकृत्य मां शत्रुभीतेरवतु कालिका
जायतां जननी सद्यः परमापत्सहायिका।।१६.४।।

किलकि किलकि बिलकार सुनि करवार
शत्रु गण भीति मानि इत उत सटकत।
खङ्ग के प्रहार ते गिराय शीश बाय मुख
योगिनी जमाति खून घट घट घटकत।
राम के गुलाम को शरण अनुमानि महा-
काली अति कोप ठानि चट चट चटकत।
बैरिन के मुण्ड को मरोरि तोरि दास हित
करन उठाय महि पट पट पटकत।।१७।।

क्षणं केलि-कलारावा: करवाल-रयश्रुते:
पलायितुमुपक्रान्ता: साध्वसाक्रान्तशत्रव:।।१७.१।।
असिना कुरुषे यावन्निकृत्तशिरसोऽहितान्
व्यात्तवक्त्रा हि योगिन्यस्तेषां चूषन्ति शोणितम्।।१७.२।।
प्रपन्नदुर्गतिं ध्यात्वा रणेऽम्बा चट्चटायते
तया कृत्तारिमुण्डाली धरित्र्यां पट्पटायते।।१७.३।।

शीश में किरीट कान कुण्डल झलकदार
हिए मणिहार ज्ञान बुद्धि को पसारती।
वाम कर वीण राजै दाहिने कमण्डलु त्यों
अक्षसूत्र धारे सब काम को सँवारती।।
दासन के हेतु महामाया को पसारि सब
शत्रुन के बुद्धि को खुवारि करि डारती।
खोदि कै खलक ते दिगंत को पँवारि देत
राम के गुलाम की सहाय मातु भारती।।१८।।

शीर्षे किरीटिनी याऽम्बा श्रुत्योः कुण्डलशालिनी
हृदये मणिहाराङ्का साऽनुकम्पेत भारती।।१८.१।।

मतिवैशद्यसम्पन्नं ज्ञानं स्फारीकरोति या
वामपाणिलसद्वीणा सा प्रकाशेत भारती।।१८.२।।

या धत्ते दक्षिणे पाणौ सुधापूर्णं कमण्डलुम्
जपमालां तथा लोलां साऽन्तः स्पन्देत भारती।।१८.३।।

साधिका सर्वकार्याणां प्रकृतेरनुराधिका
रिपूणां बाधिका या वै सा प्रवर्त्तेत भारती।।१८.४।।

असद्वृत्तिं समुन्मूल्य दिगन्तं प्रहिणोति या
सद्वृत्ति-वत्सला शक्तिः सा सहायेत भारती।।१८.५।।

सवैया

सींचि कमण्डलु के जल ते
सब शत्रुन की करती बल हानी।
बुद्धि हरै तनु रोग करै
नहिं राखत वंशहु केरि निसानी।।
छोह करै अपने जन की
वसुयाम न भूलति प्रीति पुरानी।
बालक जानि कै रामगुलामहिं
बाँह की छाँह करै ब्रह्मानी।।१९।।

ब्राह्मी त्वमरिसंघातं कमण्डलुजलोक्षितम्
निर्बलं कुरुषे रोषाद् बुद्ध्या किञ्च विलोपितम्।।१९.१।।


तद्गात्राणि विकुर्वाणा वंशवल्लीर्निकृन्तसि
स्नेहतः स्वजने प्रीतिं न मुञ्चसि पुरातनीम्।।१९.२।।

वात्सल्यकलया देवि मत्वा मामात्मजं निजम्
अनुगृह्णीष्व तत्कालं भुजच्छायाऽवलम्बतः।।१९.३।।

दोहा

एक अरी संपति हरी, अपर कीन्ह अपमान
तीजे ने चुगली चरी, चउथो छली महान।।२०।।

हृतं द्विषाऽमुना क्षेत्रममुकेनापशब्दितम्
पैशुन्यं चरितं तेन चतुर्थेन च वञ्चितम्।।२०।।



माँ कामाख्या देवी

कवित्त

जैसे चण्ड मुण्ड को धवाय सिंह केश गहि
खङ्ग को चलाय शीश काटे प्रण धरि कै।
घोर मुख बाय ताके तन को चबाय
तैसे मेरेऊ अरीन को चबाय मुख भरि कै।।
विजय विभूति जन राम को गुलाम पावै
गावै यश तेरे शीश नावै पाँय परि कै।
हेरी शिवदूती बल विक्रम अकूती
मोंहि राखिये शरण में प्रसूती भाव करि कै।।२१।।

चण्डमुण्डौ निगृह्णाना केशेषु हरिविद्रुतौ
यथा विनद्य खड्गेन त्वं न्यकृन्तः शिरोधरे।।२१.१।।

अचर्वश्च तयोर्गात्रे व्यात्तवक्त्रेण सत्वरम्
तथैव मदरिव्रातं चर्व त्वं घोरविक्रमे।।२१.२।।

विजयी रामभृत्योऽयं नम्रः कीर्त्तीरुदाहरेत्
प्रसूतिकेव दुर्धर्षे रक्ष मां शिवदूतिके।।२१.३।।

सवैया

भाल मयंक विकासित आनन
कंकन कुंडल सोहत व्याला।
बैल चढ़ी कर शूल गहे
डमरू कर में पट केहरि छाला।।
माहेश्वरी हनि शूल महा
हिये बैरिन के उपजावति ज्वाला।
त्राण करे अपने जन की
द्विज रामगुलामहिं मानति बाला।।२२।।

कङ्कणे कुण्डले व्यालान् मुखं भालेन्दुभास्वरम्
शूलं सडमरुं धत्से वृषारूढा करद्वये।।२२.१।।
सिंहचर्माम्बरेऽरीणां हृदये शूलकारिणि
माहेश्वरि द्विजं रक्ष नित्यं रघुपतिव्रतम्।।२२.२।।

तुंड प्रहार करै करि कोप
चलाय कै चक्र को शीश हरै।
सब बैरिन के उर दंत हनै
निज दासन के मन मोद भरै।।
वाराही बिजै हित टेक धरै
कर राम गुलामहिं कोप करै।
निज बाँह की छाँह में राखै सदा
जन बैरिन ते नहिं नेक डरै।।२३।।

तुण्डघातेन शत्रूणां हृदि दन्तं प्रवेशय
तच्छिरश्छेदकृच्चैव चक्रं चालय रोषतः।।२३.१।।
वाराहि हर मे त्रासं करच्छायावितानतः
हर्षणं विजयञ्चैव देयाः पणविधानतः।।२३.२।।

उद्धत कोप भयावन आनन
चक्र गहे नख आयुध सोहै।
जीह लहाय कै नाद करै बहु
देखत रूप चराचर मोहै।।
शक्ति नृसिंही नखायुध ते हनि
फारति पेट अरीनन को है।
रामगुलाम के शीश पै अंचल
छाँह किये करुणा दृग जोहै।।२४।।

नारसिंहि त्वदीयास्यं रोषतो भयदं परम्
चक्रेण शोभसे किञ्च देवि चञ्चन्नखायुधैः।।२४.१।।

नखायुधेन शत्रूणामुदरं दारयस्यहो
जिह्वोल्लासप्रणादां त्वां दृष्ट्वा लोको विमूर्च्छति।।२४.२।।

तनुया वत्सलच्छायामञ्चलस्य म्रदीयसीम्
निरीक्षस्व च सद्भक्तं शश्वत्करुणया दृशा।।२४.३।।

कवित्त

वाहन मयूर वर शक्ति कर-कंज गहे
भाल बिधुबाल ब्याल कंकण करन में।
वसन सुरंग अंग अंग में अनूप छवि
झुन झुन शब्द करें नूपुर चरन में।।
मारि मारि शक्ति मेरे वैरिन को नाश करै
शक्ति सेनानीवर जो रहे लरन में।
राम के गुलाम को बचावै सब ठौर सुत
सेवक विचारि राखै आपने शरण में।।२५।।

मयूरवाहना शक्तिं कलयन्ती कराम्बुजे
बालेन्दुमलिके सर्पौ करकङ्कणयोस्तथा।।२५.१।।
वसाना चित्रलं वासो मञ्जुला कलनूपुरा
कौमारी युध्यरीन् हन्तु भक्तं त्रायेत पुत्रवत्।।२५.२।।

सवैया

पीत पोसाक लिये कर वज्र
मतंग चढ़ी फहरावति झंडा।
शीश किरीट गरे मणिमाल
विशाल भुजा बरजोर उदंडा।।
कोपभरी वर वज्र चलाय
करै तनु वैरिन को शतखंडा।
रामगुलाम को देति अभै
वर इन्द्र की शक्ति महावरिवंडा।।२६।।

पिशङ्गवसना चैन्द्री शक्तिः पीताम्बरा वरा
किरीटं मस्तके कण्ठे दधाना मणिमालिकाम्।।२६.१।।
वज्रध्वजकरा देवी द्विपारुढा प्रवल्गताम्
शतखण्डानरीन् कृत्वा निर्भयं विदधीत माम्।।२६.२।।

शंख गदा कर चक्र गहे
धनु सायक खड्ग वरायुध सोहै।
शीश किरीट-प्रभा दरसै
छवि धाम विलोकि महामुनि मोहै।।
वैष्णवि शक्ति खगेश चढ़ी
अपने जन को करुणा दृग जोहै।
चक्र चलाय हतै सब बै-
रिन रामगुलाम को बाँह गहो है।।२७।।

दरचक्र-धनुर्बाण-गदाखड्ग-वरायुधैः
उद्यत्किरीटिनी यद्भा मुनीनां मोहकारिणी।।२७.१।।
वैष्णवी गरुडासीना शक्तिः शत्रून् निहत्य सा
स्वजनं वीक्षतां स्नेहाद् दत्त्वा हस्तावलम्बनम्।।२७.२।।

कवित्त

मति को नसाय सब शत्रु विचलाय देति
हाँथ पाँव बाँधि करि देति है महादुखी।
अरिन प्रचारि कै मरोरि शीश तोरि चीरि
फारि कै पियति खून होति है महासुखी।।
विजय विभूति निज दासन को देति नित
शरणागतन की सहाय होति है रुखी।
बाँहुन के छाँह तरे राखे अम्ब मोंहि अब
राम के गुलाम की है मातु बगलामुखी।।२८।।

सिंहनादं विधायाग्रे पाणिपादं निबध्य च
दुःखाकरोति या सद्यो विचाल्य विमतीनरीन्।।२८.१।।

तनूर्विभज्य तद्वक्षो-विदारं शीर्षकर्त्तनैः
याऽऽचामति गलद्रक्तं सत्वरा निर्वृतेश्वरी।।२८.२।।

शरण्या वरदा चासौ सर्वदा विजयप्रदा
यच्छत्वम्बा भुजच्छायां मत्कृते वगलामुखी।।२८.३।।

हाँथ बाँधि पाँव बाँधि बुद्धि बाँधि जीह बाँधि
सकल शरीर बाँधि मन करै पगला।।
प्रबल प्रचण्ड मेरे बैरिन को मान तोरि
बदन मरोरिकै निचोवै जिमि दगला।।
प्रेत के समान धावै दशह दिशान मुह
कारिख लगायकै उड़ावै जिमि कँगला।
विजय बिभूति दै कै मेरो परितोष करै
राम के गुलाम की सहाय मातु बगला।।२९।।

हस्तौ पादौ धियं जिह्वां बद्ध्वा गात्रञ्च सर्वतः
प्रमत्तं मानसं कुर्यात् सा मम प्रतिपक्षिणाम्।।२९.१।।

प्रचण्डमभिमानञ्च भित्त्वा तेषां निरर्गलम्
कलेवराणि सा नीयात् कीलालकणशून्यताम्।।२९.२।।

प्रेतास्ते दिक्षु धावन्तु रङ्का मसिमुखा इव
रामस्य सेवको जीयाद् वगलायाः प्रसादतः।।२९.३।।

शेष सहसानन ते तेरे यशगान करैं
विधि चारि आनन ते, अस्तुति करत हैं।
विष्णु चारि बाँहुन ते चमर डोलावत हैं
सैनप षडानन ते भ्रुकुटी तकत हैं।।
सभय धनेश धन माँगत हमेस रहैं
सगण महेश भौंह भंग ते डरत हैं।
राम को गुलाम किमि सुयश बखान करै
पाँयन के नीचे पुरहूतहू परत हैं।।३०।।

सहस्रवदन: शेषो विधाता चतुरानन:
चिराय ते यश:स्तोत्रं सावधानौ प्रगायत:।।३०.१।।

चतुर्भिर्बाहुभिर्विष्णु: सञ्चालयति चामरम्
सेनानी: कार्त्तिकेयश्च भ्रुवोर्भङ्गं निरीक्षते।।३०.२।।

धनदो याचते भीत्या भवतीं धनसंग्रहम्
सगण: स महेशानो भ्रुकुट्याश्च बिभेति ते।।३०.३।।

श्रयते पदयुग्मं ते सर्वदा त्रिदशेश्वर:
यशोगानं कियत् कुर्याद् वराको रामसेवक:।।३०.४।।

पहिले को पकरि पँवारि दे दिगंतन में
दूसरे को केश गहि उधर झटकि दे।
तीसरे को दुःख के समुद्र में डुबोइ बहु
बार लै भँवाइ गहि बाँहु तू सटकि दे।।
तिनके सहाय तिन्है भीति दरशाय निशि
सपन दिखाय समुझाय कै हटकि दे।
राम को गुलाम यश गान करै आठौं याम
विजय विभूति मेरे शीश पै पटकि दे।।३१।।

निगृह्य प्रथमः क्षेप्यो दिगन्तेषु द्रुतं क्वचित्
केशग्राहं द्वितीयोऽपि विदूरीक्रियतामरिः।।३१.१।।
बाहुग्राहं तृतीयोऽसौ विक्षेप्यो विपदर्णवे
सहाया इतरे तेषां वर्ज्याः स्वप्नावलोकतः।।३१.२।।
वसुयामं यशो गायत्येष राघवकिङ्करः
जयस्य तिलकं मातर्ललाटेऽस्य विधीयताम्।।३१.३।।

सवैया

जाहिर वेद पुराणन में
सहसानन हूँ यह बात निबेरे।
नाम लिए दुख सिन्धु सुखात
परात हैं पाप न आवत नेरे।।
तूँ ही विचारि कहौ जगदम्ब
कहै जन रामगुलाम सुदेरे।
मातु सहाय भई केहिके-
न बनी केहिके न रटे गुण तेरे।।३२।।

शेषेण भाषितं किञ्च ख्यातं वेदपुराणयोः
त्वन्नामग्रहणेनैव शुष्यन्ति विपदब्धयः।।३२.१।।

पापान्यपि पलायन्ते नायान्ति जनसन्निधौ
इति स्मारयते सोऽयं रामचन्द्रपदानुगः।।३२.२।।

स्वयं विचार्यतामम्बे सहाया कस्य नाभवः
भूतले ते गुणाशंसी पूर्णकामो न कोऽभवत्।।३२.३।।

कवित्त

भूमि गिरि कानन में दिग्गज निशानन में
वेद औ पुराणन में तूहीं तौ समानी है।
नर पशु व्यालन में वृद्ध युवा बालन में
सौम्य औ करालन में तैंही दरशानी है।।
तृण तरु बागन में राग औ बिरागन में
कूप औ तड़ागन में महिमा महानी है।
राम को गुलाम एक मुख ते बखाने किमि
कर्म मन बानी तैंही प्रकृति पुरानी है।।३३।।

धरित्र्यां पर्वतेऽरण्ये दिग्गजानाञ्च संश्रये
वेदेष्वपि पुराणेषु त्वमेवैका विराजसे।।३३.१।।

जरत्तरुणबालेषु पशुव्यालेषु नृष्वपि
सौम्येषु च करालेषु त्वमेवैका विलोक्यसे।।३३.२।।

तृणेषु तरुकुञ्जेषु मञ्चे राग-विरागयोः
स्यन्दते चतुरस्त्रं ते कीर्त्तिः कूपतडागयोः।।३३.३।।

वाचामगोचरी त्वं वै मनोवाक्कर्मभिर्मया
स्वीकृताऽसि महामाये पुराणी प्रकृतिः परा।।३३.४।।

टुचन दबावै दुख दारिद नसावै
जन सुखित बसावै गृह संपति भरा करै।
कीरति बढ़ावै वै जनावै छितरावै
अरि भीति ते बचावै सब संकट हरा करै।।
शरणागतन की न भूलै सुधि एक छन
खड्ग लिये हाँथ आठौं याम पहरा करै।
राम के गुलाम को बचावे छली छुद्रन तें
तेरो यश गावै तेरे चरन परा करै।।३४।।

द्विषो जहि विपद्-दैन्ये दूरीकुरु जनादहो
सुखोषितस्य चाप्यस्य वेश्म पूरय सम्पदा।।३४.१।।

यशो वर्धय सर्वत्र प्रकाशय च तद् द्रुतम्
अरीन् विकीर्य तत्त्रासाद् रक्ष भक्तमकण्टकम्।।३४.२।।

क्षणं विस्मर मा देवि शरणागतवत्सले
करवालकरा रक्षामहोरात्रं समाचर।।३४.३।।

सीतापतिविधेयोऽयं नम्रः कीर्त्तिकुशीलवः
छलिभ्यः क्षुद्रवैरिभ्यो रक्षणीयस्तवाम्बिके।।३४.४।।

कपटी कुचाली क्रूर कलही कलंकी खल
वंश में विद्वेषी प्रिय काहू को न लागे हैं।
बोलत लबारी हठि देत सबै गारी
परनारी परधन में विशेष अनुरागे हैं।।
सुपथ नेवारि कै कुपंथ में लगावैं सबै
डहकि डहकि चारि गाँव निति बागे हैं।।
राम को गुलाम परि पाँव कहै अम्ब तोंहि
ऐसे के वधे ते नहिं खोरि कछु जागे हैं।।३५।।

इमे कपटिनः क्रूराः कुवृत्ताः कलहप्रियाः
कलङ्किनः कुलद्वेषात् खलाः कस्यापि नो प्रियाः।।३५.१।।

मृषा सगालि भाषन्ते सर्वैः साकं दुराग्रहात्
दारेभ्योऽपि च वित्तेभ्यः परेषां स्पृहयालवः।।३५.२।।

बलात् प्रवर्त्तयन्तेऽमी सुपथात् कुपथे नरान्
वल्गन्ते च वृथा नित्यं ग्रामाद् ग्रामान्तराण्यहो।।३५.३।।

नत्वा निवेदयत्येष कौशल्येयस्य किङ्करः
हत्वेदृशान् न वै किञ्चिद् वचनीयं प्रजायते।।३५.४।।

सवैया

गर्ब गरूर भरो दुरयोधन
लै शकुनी महभारत ठानी।
पारथ को नहिं भाग दियो
न रही तेंहि वंशहुँ केरि निशानी।।
श्री नन्दलाल सहायक भे
भगिनी तिन की तुमको हम जानी।
रामगुलाम को तेरइ आस
निरास करौ जनि सेवक मानी।।३६।।

शकुनेः सहयोगेन दृप्तो दुर्योधनः पुरा
महाभारतमारेभे पार्थभागञ्च नो ददे।।३६.१।।

हरिणोन्मूलितस्तस्य राजवंशो महीतलात्
त्वामहं भगिनीं मन्ये तदीयामरिघातिनीम्।।३६.२।।

इतीव रामभक्तोऽयं साभिलाषोऽस्ति साम्प्रतम्
निजानुगो न हे मातर्निराशः संविधीयताम्।।३६.३।।

कवित्त

प्रबल प्रचण्ड वरिवण्ड भुज तेरे अम्ब
वाहन को केसरी उदण्ड अति बाँका है।
चोखे चोखे अस्त्र शस्त्र करन में राजत हैं
भक्त दुखनाशन विरद शुभ जाका है।।
सातौं शक्ति हाजिर हजूर हाँथ जोरे खड़ीं
भ्रुकुटी बिलोकि बार बार रुख ताका है।
राम के गुलाम की पुकार न सुनत अम्ब
गिरन चहत तेरो सुयश पताका है।।३७।।

प्रचण्डा जनि दोर्दण्डाः सिंह उद्दण्डवाहनम्
अस्त्रशस्त्राणि तीव्राणि त्वद्भुजानां प्रसाधनम्।।३७.१।।

भक्तार्तिनाशिनी कीर्त्तिर्भवत्या दिक्षु वर्तते
बद्धाञ्जलिपुटाः सप्त शक्तयो भान्ति सन्निधौ।।३७.२।।

तथापि शृणुषे नैव रामकिङ्करचीत्कृतम्
जगदम्बे पतत्येषा पताका यशसस्तव।।३७.३।।

तेरे सम दूसरो न भक्त दुख नाशक है
दुखी दीन बलहीन कौन जग मोसो है।
परम उदार तू कृपण धनहीन मैं तू
स्वामिनी हमारी मोंहि तेरइ भरोसो है।।
कौन हेतु ढील परै मेरी न सुरति करै
स्वप्नहूँ देखाय न करत परितोसो है।
राम के गुलाम की विपत्ति देखियत अम्ब
चीरी को मरन खेल बालकनि को सो है।।३८।।

त्वत्समा नापरा काचिद् भक्तपीडापहारिणी
न च मत्सदृशो लोके दीनो व्यापद्गतोऽपर:।।३८.१।।

स्वामिनी त्वमुदाराऽसि कृपणोऽहं त्वदाश्रित:
स्वप्नेऽपि सान्त्वनां नैव ददती किमुपेक्षसे।।३८.२।।

जनस्य वीक्षसे कृच्छ्रां कुदशां जगदम्बिके
त्वत्कृते बालकेलि: स्यात् पतङ्गानां निबर्हणम्।।३८.३।।

छूटी पुरहूती को पुरंदर बहोरि पायो
हिमगिरि जाय तोंहि अस्तुति सुनाये ते।
सुरथ भुवाल की विपत्ति सब छूट गई
बहुरि नृपाल भए रक्त के चढ़ाये ते।।
केश गहि कंस को पछारे वसुदेवसुत
तैंही बन्दीछोर भई गोद के लिआये ते।
राम के गुलाम की विपत्ति सब छूटि जैहैं
तेरे बाँह छाँह अम्ब तेरे यश गाये ते।।३९।।

हिमाद्रौ ते स्तुतिं कृत्वा देवराजो दिवश्च्युतः
पुनरिन्द्रपदं प्राप भगवत्याः प्रसादतः।।३९.१।।

सुरथः शोणितं स्तोकं निवेद्य विपदोऽतरत्
अभिषेकजलैर्भूयः सस्नौ सिंहासने नृपः।।३९.२।।

वसुदेवः स्वतन्त्रोऽभूत् त्वामुत्सङ्गेन लालयन्
केशग्राहञ्च तत्पुत्रः कंसं चिक्षेप भूतले।।३९.३।।

सर्वा दूरं प्रयास्यन्ति मदीया अपि चापदः
जनन्याः पाणिसच्छाया-यशोगीतिकयाऽनया।।३९.४।।

करिकै हुंकार निज पाँव के इसारन ते
पूँछ पटकाय महि सिंह को उछालि दे।
लूम को लफाय मुख बाय मोछ फरकाय
जीभ लहकाय मेरे बैरिन में डालि दे।।
भुजा को उठाय फैलाय बाहुदंड अम्ब
बैरिन के कंठ पै अखर्व खड्ग घालि दे।
राम के गुलाम को अभीति करु बेगि मातु
सेवक बिचारि निज बानि प्रतिपालि दे।।४०।।

सहुङ्कृति पदाक्रान्त्या व्यात्तवक्त्रं स्फुरत्सटम्
स्फारजिह्वं चलत्पुच्छं हर्यक्षं प्रेरयारिषु।।४०.१।।

उद्यतं भुजमुल्लास्य दण्डवत् तरसाऽम्बिके
अखर्वं पातयासिं मे कण्ठनाडीषु विद्विषाम्।।४०.२।।

निर्दरो जायतामेष यथा तव वशंवदः
जगन्मातस्तथा स्वीयं वचनं परिपाल्यताम्।।४०.३।।

सवैया

स्वान सृगाल भयावन शोर
करैं मम बैरिन को तनु नोचैं।
मण्डल गीध करैं शिर ऊपर
आँखन बीच हनैं निज चोचैं।।
रोंवहि नारि हनैं कर ते शिर
आँसु बहाय कहैं तेंहि पोचैं।
रामगुलाम लहै सुख संपति
तेरेहि आस तजै सब सोचैं।।४१।।

अरिगात्राणि कृन्तन्तो रसन्त्वभ्रे श्वफेरवः
मूर्ध्नश्च मण्डलीकृत्य गृध्राः क्षिण्वन्तु तद्दृशः।।४१.१।।

पाणिताडितमूर्धानो रुदन्तु रिपुयोषितः
साश्रुधारं विगर्हन्त्यः स्वान् पतीन् पापकर्मणः।।४१.२।।

त्वदनुग्रहसाकाङ्क्षो जहातु सकलाः शुचः
रघुवीरविधेयोऽयं लभतां सुखसम्पदः।।४१.३।।

कीधौं पुकार परी नहिं कानन
कीधौं कृपा उर ते रितई है।
कीधौं विचार करै कंछु और
किधौं कछु सीखति रीति नई है।।
की मम फोरन जोग कपार
लहौं फल सो जस बीज बई है।
रामगुलाम कहै सुनु अम्ब
कहौ केहिं हेतु बिलम्ब भई है।।४२।।

कर्णगोचरमाह्वानं न जातं शरणार्थिनः
किं वा रिक्तोऽभवत् कोषः कृपाया हृदये तव।।४२.१।।

चिन्तयस्यन्यथा किं वा रीतिरन्याऽनुशिक्षिता
अथवा निजदुर्भाग्यैरुप्तपूर्वं फलं लभे।।४२.२।।

अयं जिज्ञासते चिन्तामग्नो भक्तिपरायणः
अम्बिके हेतुना केन विलम्बः क्रियते त्वया।।४२.३।।

हाँथ गिरै यदि झूठ लिखौं
अरु जीभ गिरै जो कहौं कछु झूँठी।
शास्त्र पुराणन को मत छोंड़ि
कहौं नहिं दूसरि बात अनूठी।।
तू सब के उरव्यापिनि अम्ब
अहै मम कार्य तिहारेई मूठी।
रामगुलाम विचार करैं
कैंहि कारण मातु अहौ तुम रूठी।।४३।।

हस्तः पतेदसत्यं चेल्लिखामि ननु सर्वगे
जिह्वा पतेदसत्यं चेद् ब्रवीमि तव सम्मुखे।।४३.१।।

वच्मि नो कल्पितं हित्वा मतं शास्त्रपुराणयोः
प्रसीद कुरु मे कार्यं त्वदधीनं तदम्बिके।।४३.२।।

एक को मारि अनेकन को सुख
दीजै दया करि कै जगदम्बा।
दु:ख अनेकन को हरिये हठि
बेगि न कीजिय मातु बिलम्बा।।
कीरति बेलि बढ़ाय कै जग्त में
अम्ब न कीजिय ताहि विडम्बा।
रामगुलाम को आरत जानि कै
बाँह के छाँह की दे अवलम्बा।।४४।।

हत्वैकं सुखयानेकान् दु:खं दूरय सत्वरम्
वर्द्धिता कीर्त्तिवल्ली ते स्वयं नैव विडम्ब्यताम्।।४४.१।।

अनुगृह्णीष्व हे मातर्विज्ञाय व्यथितं जनम्
हस्तच्छायाऽवलम्बेन परिसान्त्वय साम्प्रतम्।।४४.२।।

कवित्त

उदित मयंक के समान मुख तेरो लाल
शीश पै किरीट मारतण्ड सम भ्राजै है।
कानन में कुण्डल कपोलन में ज्योति जगै
हिये मणिहार कटि किंकिनी बिराजै है।।
लाल रंग सारी जरतारी की किनारी लगी
आठहुँ भुजन में बरायुध समाजै है।
राम के गुलाम शीश बाँहुन की छाँह किये
बैरिन को हेरि हँसि करति पराजै है।।४५।।

उदीयमानचन्द्राभं पाटलं मुखमण्डलम्
किरीटञ्च ललाटाग्रे भास्वद्वर्णं विराजते।।४५.१।।

कर्णयोरपि शोभेते कपोलद्योतिकुण्डले
मणिहार उरोदेशे कट्याञ्च कलकिङ्किणी।।४५.२।।

तनौ स्वर्णिमपर्यन्ता शाटिका शोणवर्णिनी
अष्टपाणिषु दीप्यन्ते दिव्यास्त्राणि सदा तव।।४५.३।।

मयि कम्रां करच्छायां कुर्वाणा रामकिङ्करे
शत्रून् स्मितलवैरेव कुरु सद्यः पराजितान्।।४५.४।।

शुम्भ निशुम्भ को मारि दयावति
देवन को तू दियो वरदान है
गाढ़ परै जबहीं सुमिरो मोहिं
हौं धरि देह करौं तव त्रान है।।
सो सुधि है किधौं भूलि गई
केंहि कारण होत बिलम्ब महान है।
रामगुलाम कहैं सुनु अम्ब
प्रमाण सही मार्कण्ड पुरान है।।४६।।

त्वया शुम्भो निशुम्भश्च दयावति हतौ यदा
निर्जरेभ्यस्तदा प्रत्तं वरदानं सनातनम्।।४६.१।।

भवद्भिः स्मरणीया स्यां सत्यामापदि सर्वदा
साऽहं केनापि रूपेण करिष्याम्येव रक्षणम्।।४६.२।।

मार्कण्डेयपुराणस्य प्रमाणं तदिदं त्वया
स्मर्यते विस्मृतं वाऽम्बे विलम्बो यद् विधीयते।।४६.३।।

काहि गोहराऊँ केहिं बिपति सुनाऊँ
लिखि अर्ज पहुँचाऊँ अम्ब काके पास जाय कै।
मोको एक तैहीं तौ देखाति भीतिभंजनी
विहाय तोहि जाऊँ कहाँ कहौ सो बुझाय कै।।
गाढ़ परे गैयर गोबिन्द को पुकार कीन्हो
हौं हूँ आजु तोहि कहौं टेर को लगाय कै।
राम के गुलाम की गोहारि न सुनत
दिन ऐसहीं बितैहौ कि चितैहौ चित लाय कै।।४७।।

आकारयाणि कं कं वा श्रावयाणि व्यथाकथाम्
लेखबद्धमुपालम्भं कस्य पार्श्वे ददान्यहम्।।४७.१।।

मद्दृशाऽसि त्वमेवैका भुवने भयहारिणी
आचक्ष्व कुत्र यामि त्वां विहाय जगदम्बिके।।४७.२।।

आजुहाव विपद्ग्रस्तो यथा स्तम्बेरमो हरिम्
तथैव भवतीं तारं क्रन्दन्नद्य समाह्वये।।४७.३।।

आकर्णयसि नो मातः शरणप्रार्थनारवम्
काम्यः कालातिपातस्ते साकूतो वा दृशां क्रमः।।४७.४।।

अर्थ धर्म काम मोक्ष भरे हैं भँडारन में
डारन में कल्पतरु फूल झहरात हैं।
अष्टसिद्धि नवौ निद्धि सेवा सावधान ह्वै के
अम्बरुख ताकैं भौंह भंग ते डेरात हैं।।
भूतनाथ भैरव गजानने समेत गण
सातौं शक्ति सायुध ससैन्य डहरात हैं।
अम्ब तेरे द्वार द्विज राम को गुलाम कहैं
बिजय पताके नाक नाके फहरात हैं।।४८।।

धर्मार्थकाममोक्षास्ते भाण्डारे सम्भृतास्तथा
यथा कल्पतरोः शाखासन्दोहे पुष्पसम्पदः।।४८.१।।

सिद्धयोऽष्ट नवाङ्काश्च निधयोऽवहिताः सदा
सङ्केतं प्राप्य सेवन्ते ते भ्रूभङ्गाच्च बिभ्यति।।४८.२।।

भैरवो भूतनाथश्च सगणः स गणाधिपः
ससैन्याः सायुधाः सप्त शक्तयोऽपि तवानुगाः।।४८.३।।

द्विजो रामाश्रयो ब्रूते नाकचत्वरसन्निभे
द्वारे जनि तवानेके दोधूयन्ते जयध्वजाः।।४८.४।।

शूल को उठाय कै विदारि उर बैरिन को
खड्ग को चलाय शीश भूमि में गिरावै है।
घण्ट को बजाय कै बधिर करि डारै अम्ब
धनुष टँकोर करि भीति उपजावै है।।
पूरब प्रतीची दिशि दक्षिण उदीची निज
शूल को भ्रमाय मेरी बिपति नसावै है।
राम को गुलाम तेरी कीरति बखान करै
शीश तोंहि नाय कै विमल यश गावै है।।४९।।

घण्टानादैररीन् मातर्बधिरान् कुरु सत्वरम्
धनुष्टङ्कारसंरावैस्तनु भीतिं तदन्तरे।।४९.१।।
शूलमुत्तोल्य शत्रूणां कुरु वक्षोविदारणम्
खड्गं सञ्चाल्य मूर्ध्नस्त्वं पातयेरवनीतले।।४९.२।।
प्राक्प्रतीच्योर्निजं शूलं याम्योदीच्योश्च तन्वती
गायतः सुयशः पुण्यं नम्रस्य विपदो हर।।४९.३।।

सवैया

हैं जितने तव सौम्य स्वरूप
स्वभाव सोहावन पावन हैं।
जिन तीनहुँ लोकन में विचरैं
अति घोर कठोर भयावन हैं।।
दर चक्र गदादिक आयुध जे
तुमरे कर में मनभावन हैं।
मिलि कै सब रक्षा करैं द्विज राम
गुलामहुँ को यश गावन हैं।।५०।।

सौम्यपावनरूपाणि सन्ति भास्वन्ति यानि ते
यानि घोरकठोराणि त्रिलोकीभयदानि च।।५०.१।।

शङ्खचक्रगदास्त्राणि भान्ति पाणिषु यान्यपि
समेत्य तानि कुर्वीरन् द्विजस्य मम रक्षणम्।।५०.२।।

कवित्त

परम उदार तूँ है कृपण दरिद्र मैं हौं
पावन पवित्र तूँ है मैं हौं अति पातकी।
प्रबल प्रचण्ड तूँ है दीन बलहीन मैं हौं
अरिन ते घेरे मैं हौं तूँ है अरिघातकी।।
कीजै न विलम्ब जगदम्ब वेगि सुधि लीजे
मानि लीजे जौन मन भावै तौन नात की।
राम के गुलाम को तजे ते न बनत जाहि
एकइ अधार है चरण जलजात की।।५१।।

त्वमुदाराऽसि दीनोऽहं त्वं पूताऽहञ्च पातकी
त्वं समर्थाऽरिविध्वंसे जीनोऽहं संवृतोऽरिभिः।।५१.१।।

द्रुतं केनापि भावेन स्मर मां जगदम्बिके
रामानुगः पदाब्जं ते श्रितो न स्यामुपेक्षितः।।५१.२।।

सवैया

सातहु स्वर्ग रसातल सातहु
को नहिं मानत शासन तेरो।
विश्व में व्यापिनि तूँ जगदम्ब
सदा सब के उर में तव डेरो।।
फेरि कुबुद्धिन की मति को
शुभ बुद्धि दै मातु हरौ दुख मेरो।
राम गुलाम को दीजै विजै-वर
सेवक जानि करौ जनि देरो।।५२।।

सप्त स्वर्गास्तथा सप्त पातालानि वशे तव
त्वमेव विश्ववाराऽसि विश्वेषां हृदि संस्थिता।।५२.१।।

अरीणां कुमतिर्मातः सन्मत्या परिवर्त्यताम्
दीयतां विजयस्याशीरचिरेणानुगामिने।।५२.२।।

कवित्त

तैं ही ह्वै कै भूमिजा दशानन को नाश करि
लंकगढ़ नायक विभीषण को कीन्ही है।
तैं ही काली रूप धरि मारी सहसाजन को
राघव की बाँह पूजि जग यश लीन्ही है।।
द्रौपदी स्वरूप ह्वै कै कौरव दल नाश करि
विजय विभूति यश पारथ को दीन्ही है।
राम को गुलाम कहै तैं ही बहुरूप धरै
भक्तन के हेतु मातु तो को हम चीन्ही है।।५३।।

त्वमेव भूमिजा भूत्वा नाशयित्वा दशाननम्
सद्यः कृतवती लङ्कामहाराजं विभीषणम्।।५३.१।।

कालीरूपं विनिर्माय सहस्त्रार्जुनशातनी
रामस्य पाणिपूजायाः कीर्तिं जगति चातनीः।।५३.२।।

पाञ्चालीविग्रहा त्वं वै कौरवाणां विनाशकृत्
विजयाङ्कां ददे कीर्तिं विपुलां सव्यसाचिने।।५३.३।।

बहुरूपधरां देवीं भक्तसौहित्यहेतवे
जनो रामविधेयस्त्वां मातः पर्यचिनोदयम्।।५३.४।।

सवैया

मानहिं मातु पिता नहिं देवन
साधु की संगति में अनुरागैं।
नेह करैं पर नारिन में
परवित्त के खोजन में निति बागैं।।
झूँठइ लेन और झूँठइ देन
औ झूँठइ में निशि वासर जागैं।
राम गुलाम कहै सुनु अम्ब
वधे इनके कछु दोष न लागैं।।५४।।

मन्यन्ते पितरौ नेमे रमन्ते न सतां व्रजे
परनारीषु रज्यन्ते भ्रमन्ति परसम्पदे।।५४.१।।

मृषाऽऽदानप्रदानार्थं नक्तन्दिवमतन्द्रितान्
एतान् हत्वा न वै दोषाः केऽपि भूयासुरम्बिके।।५४.२।।

झूलना

प्रगटि हिम शैल पर नाम बर कौशिकी
स्नान-मिसि जासु चिरगंगवारी।
देव गण टेर सुनि जात-हित हेतु गुनि
दीन वरदान जन अभयकारी।।
दूत मुख बैन सुनि शुम्भ-वधे हेतु गुनि
क्रोध की अग्नि धूवाक्ष जारी।
चण्ड अरु मुण्ड हति शीश निज हाँथ गहि
अर्पि जगदम्बिकहिं शुम्भ मारी।।५५।।

पूर्वं कृतवती स्नानं भवती जाह्नवीजले
निशम्य तत्र देवानां क्रन्दितं वत्सलाऽभवत्।।५५.१।।

हिमाद्रौ प्रकटीभूता त्वच्छाया ननु कौशिकी
निर्भयान् विदधे चासौ तान् सर्वान् वरदानतः।।५५.२।।

निशम्य दूतसन्देशं शुम्भोत्सादननिश्चया
पूर्वं रोषाऽर्चिषाऽधाक्षीद् धूम्राक्षं तद्बलाधिपम्।।५५.३।।

भवत्यै साऽर्पयामास शिरसी चण्डमुण्डयोः
अन्ते च शुम्भदैत्यस्य निबर्हणमचीकरत्।।५५.४।।

छप्पय

युग बलि पशु के शीश मातु तुम ग्रहण करीजै।
मारहु शुम्भ निशुम्भ वेगि देवन दुख छीजै।।
अभय बाँह की छाँह वेगि देवन को दीजै।
सुख पैहैं सब लोग जगत में यश करि लीजै।।
सुनि काली के वर वचन प्रमुदितमन जगजननि हँसी।
चामुण्डा कहि नाम धरि सुखित शैल पर रहति बसी।।५६।।

स्वीकुरुष्व जगन्मातर्मेध्यजन्तुशिरोद्वयम्
जहि शुम्भं निशुम्भञ्च सुराणां दुःखहानये।।५६.१।।

भुजयोरभयच्छायां दीनेभ्यो देहि सत्वरम्
जगत्यां सुखमास्तीर्य यशः सञ्चिनु शाश्वतम्।।५६.२।।


काल्या वरवचः श्रुत्वा जहास जगदम्बिका
तां चामुण्डाञ्च संज्ञाप्य शैलपृष्ठमधिष्ठिता।।५६.३।।

पद्धरी

निशुम्भ शुम्भ मारि मातु जग्त को सुखी कियो।
सँहारि रक्तबीज तासु रक्त जीभ लै पियो।।
अभीति बाँह छाँह देवराज को यथा दियो।
तथा सहाय राम के गुलाम हू कि कीजियो।।५७।।

सा निशुम्भान्वितं शुम्भं हत्वा तेने जगत्सुखम्
रक्तबीजञ्च संहृत्य जिह्वया तदसृक् पपौ।।५७.१।।

अम्बा ददौ भुजच्छायामभयां वज्रिणे यथा
रामानुगामिनः कुर्यात् तथा साहाय्यकं मम।।५७.२।।



भूखी माता जी, उज्जैन

प्रचण्ड बाँहु दण्ड हैं अखण्ड ओज ते भरे।
उठाय शूल मारि कै घमण्ड शत्रु के हरे।।
गुमान गर्व तोरि कै अरीन करौ बावरे।
जिताइये गुलाम को बनाय मातु डावरे।।५८।।

प्रचण्डौ तेऽम्बिके बाहू अखण्डौजःसमन्वितौ
शूलाघातेन शत्रूणां त्वञ्च गर्वं व्यपोहसि।।५८.१।।

तेषां हृताभिमानानां मनःस्वास्थ्यं विकारय
विधेयं जयिनं किञ्च तनयं संविधेहि माम्।।५८.२।।



मॉं नगरकोट महारानी, उज्जैन

कृपा कटाक्ष कोर ते निहारिहौ हमैं जबै।
समस्त शत्रु हानि भीति मानि भागिहैं तबै।।
बिजै बिभूति राम को गुलाम पाइहै कबै।
कृपा कटाक्ष के अधीन जग्त कार्य है सबै।।५९।।

कृपाकटाक्षकोणेन यदा प्रेक्षिष्यसे जनम्
तदैव शत्रवो भीताः करिष्यन्ति पलायनम्।।५९.१।।
कदा रामसहायोऽयं लप्स्यते विजयश्रियम्
ब्रूहि मातस्तवाशीर्भिः स्पन्दते जगतीतलम्।।५९.२।।



विंध्यवासिनी माता, उज्जैन

सवैया

भीति हस्यो सब देवन की
रण में बिजई महिषासुर मारो।
कौन कुसंकट मोर गरीब को
जो तुमसों नहिं जात है टारो।।
रामगुलाम करै बिनती
जगदम्ब सुनो यह अर्ज हमारो।
सेवक मानि कै बेगि हरौ दुख
गान करों कलकीर्ति तिहारो।।६०।।

हताः सुरभियो हत्वा सैरिभं समितिञ्जयम्
सङ्कटं मे कियन्मातर्यत् त्वया नापनुद्यते।।६०.१।।
स्तुतिं मे शृणुया मातः सानुरोधमुदीरिताम्
विपदं सेवकस्याशु हर गास्यामि ते यशः।।६०.२।।

जानौं नहीं कछु मंत्र न यंत्र
न अस्तुति की विधि को कछु जानौं।
ध्यान अवाहन और विलापन
पूजन-रीति नहीं अनुमानौं।।
रामगुलाम कहै सुनु अम्ब
अहै मम एकहि भाँति ठिकानौं।
तूँ शरणागत पालिनि हौ
मैं अहौं शरणागत बाल अजानौं।।६१।।

मन्त्रं यन्त्रं न वा जाने न शुद्धां स्तोत्रपद्धतिम्
ध्यानमावाहनं नैव रोदनं न च पूजनम्।।६१.१।।
वक्ति रामस्य वश्योऽयमेक एव ममाश्रय:
त्वं शरण्याऽसि बालोऽहं शरणार्थी तवाम्बिके।।६१.२।।

हैं जग में सुत तेरे अनेकन
शील सनेह स्वभाव को साँचो।
ता महँ मैं विरलो यक अम्ब
अहौं तव सेवन में अति काँचो।।
तौ परिणाम न त्यागन योग
कहै द्विज रामगुलाम सुबाँचो।
होत कपूत अनेकन जग्त में
मातु कुमातु मिलै नहिं जाँचो।।६२।।

शीलस्नेहस्वभावाद्यैरनेके ते सुतोत्तमाः
विरलस्तेष्वहं मातः सेवायामकृतश्रमः।।६२.१।।

यद्यपि त्यागयोग्योऽहं परं नम्रं निवेदये
कियन्तोऽपि कुपुत्राः स्युः कुमाता काऽपि नो भवेत्।।६२.२।।

हे जगमातु सुनो मम बात
नहीं पद-सेवन में अनुरागौं।
दान दियो नहिं विप्रन को
तव धाम में जाय नहीं कहुँ बागौं।।
छोह न छाँड़ति तापर अम्ब
कहै द्विज रामगुलाम सुभागौं।
होत कपूत अनेकन जग्त में
मातु कुमातु मिलै नहि माँगौं।।६३।।

श्रूयतामम्बिके कामं न स्यां चरणसेवकः
द्विजेभ्यो दानकर्मा वा तीर्थाटनपरायणः।।६३.१।।

जाने तथापि ते स्नेहं स्पन्दमानमनारतम्
कियन्तोऽपि कुपुत्राः स्युः कुमाता काऽपि नो भवेत्।।६३.२।।

देवन की सब आस विहाय कै
प्रेम बढ़ाइ करौं यश गाना।
बीति गए दिन सम्बत साठि
भयो तन जीरण वृद्ध महाना।।
तू जौ निरास करौ जननी
तौ कहौ केहिं के ढिग मोर ठेकाना।
रामगुलाम को सेवक मानि
गणेश की मातु हरौ दुख नाना।।६४।।

ललाटदर्शितां त्यक्त्वा देवानां ते स्तुतौ रतः
जातोऽहं षष्टिवर्षीयो वर्षीयानतिजर्जरः।।६४.१।।

त्वं निराशं विधत्से चेन्मातरन्यः क्व संश्रयः
हेरम्बजननि क्लेशान् सेविनो मेऽपनोदय।।६४.२।।

आपद वारिधि में अति मग्न
अहौं सुमिरौं तोंहि शीश नवाई।
तूँ करुणा की समुद्र भरी
जननी जनि मानहु तूँ शठताई।।
बालक भूँख पियास ते पीड़ित
व्याकुल ह्वै गोहरावत माई।
रामगुलाम की बाँह गहौ
दुख-सागर ते अब लेहु बचाई।।६५।।

विपदब्धौ निमग्नोऽहं त्वां स्मरामि कृताञ्जलिः
दयापयोनिधे मान्यो नायं मम दुराग्रहः।।६५.१।।

जननीमाह्वयत्येव क्षुत्पिपासाकुलः शिशुः
दत्त्वा करावलम्बं मामापत्सिन्धोः समुद्धर।।६५.२।।

कवित्त

तेरो रुख पाइ कै विरंचि उपजावै जग
तेरो रुख पाइ विष्णु पालन करत हैं।
तेरो रुख पाइ रुद्र करत संहार अम्ब
तेरो रुख पाइ शेष भार को धरत हैं।।
इन्द्र यम वरुण कुबेर सोम सूर्य अग्नि
पवन प्रजेश भौंह भंग तें डरत हैं।
विजय विभूति तेरी करुणा कटाखन ते
राम के गुलाम हूँ को काज सुधरत हैं।।६६।।

त्वत्सङ्केतेन संसारं करोति चतुराननः
हरिः पाति हरो हन्ति मूर्ध्ना वहति वासुकिः।।६६.१।।

देवेन्द्रो वरुणः कालः कुवेरः सोमभास्करौ
वह्निवातप्रजेशाश्च ते भ्रूभङ्गात् प्रबिभ्यति।।६६.२।।

आप्येत विजयैश्वर्यं ते दृगञ्चलवीक्षितैः
लक्ष्यजातञ्च लभ्येत कविना पदसेविना।।६६.३।।

खैंचि कै कमान निज कान लगि तानि अम्ब
बाण को चलाय मेरे बैरिन को मारि दे।
चक्र को चलाय चारौं ओर चमकाय बल-
विक्रम देखाय शीश काटि महि डारि दे।।
शूल को उठाय कै पठाय भानु मण्डल लौं
मेरे प्रतिकूलन को वपुष विदारि दे।
राम के गुलाम की गोहारि करु वेगि अम्ब
शत्रुन सँहारि महा-प्रलय सी पारि दे।।६७।।

कर्णान्तकृष्टशिञ्जाया मुक्त्वा बाणान् द्विषो जहि
चञ्चच्चक्रेण तन्मूर्ध्नः कर्त्तयित्वा क्षितौ क्षिप।।६७.१।।
सूर्योच्छ्रायेण शूलेन तनूर्दारय विद्विषाम्
निशम्य मम चाह्वानं शात्रवे प्रलयं कुरु।।६७.२।।

सवैया

जबहीं जब गाढ़ परै जन को
तबहीं तब तूँ तनु धै दुख दाहै।
सति है सब वेद पुराण कहैं
अरुझी सुरुझै करुणा के उमाहै।।
कछु मानत हैं न कहे जन के
मदमान भरो धन गर्व महा है।
जननी जन रामगुलाम के हेतु
न दे अवलम्ब विलम्ब कहा है।।६८।।

अवतीर्य सुखं दत्से दुःखिने स्वानुगामिने
निगमागमवागेषा ते दया शंविधायिनी।।६८.१।।

रिपवो धनगर्वेण मन्यन्ते न जनोदितम्
अतो जननि मत्कार्ये देहि सद्योऽवलम्बनम्।।६८.२।।

रूपघनाक्षरी

सुनैं वेद न पुरान धर्मशास्त्र को न मान
धनगर्व ते महान चलैं ऐंठि इतरान।
पंच परम प्रधान की न बात करैं कान
बात आपने ही ओर की बढ़ावैं हठ ठान।।
क्रूर कुटिल महान कुल कज्जल समान
परवित्त परनारिन में लोभ अधिकान।
बिना कारण कर बैर करि करैं नोकसान
तिन्हैं चण्डी रण ठानि झुकि झारै किरवान।।६९।।

वेदानिमे न शृण्वन्ति न पुराणान्यधार्मिकाः
सम्पद्गर्वेण सर्पन्ति न्यायं न्यक्कृत्य कामतः।।६९.१।।

क्रूरा अतीव वक्राश्च कुलकज्जलसन्निभाः
परवित्तकलत्रेषु सन्तीमे लोभशालिनः।।६९.२।।

अहेतुवैरिणः किञ्च मम हानिं चिकीर्षतः
कुर्यादिमान् रणे चण्डी खड्गधारापथातिथीन्।।६९.३।।

राखैं गुरु से गुमान बैर विप्रन सों ठान
बोलैं बात बेप्रमान वेदशास्त्र को न ज्ञान।
उर कुलिश समान दयाहीन जैसे स्वान
धावैं दशहू दिशान काटैं सर्प के समान।।
झूँठी बात को बखान मोहैं सकल जहान
नर नारिन को प्रेरि कै मचावैं घमसान।
लोभ मोह काम क्रोध के हैं हाँथ में बिकान
तिन्हैं चण्डी रण ठानि झुकि झारै किरवान।।७०।।

गर्वशीलान् गुरौ विप्रे वैरशीलान् मृषागिरः
निगमागमतो बाह्यान् कुलिशस्तिमितोरसः।।७०.१।।

श्वसदृङ्निर्दयान् दिक्षु वल्गितानहिदंशिनः
असद्वाग्विभ्रमैर्लोके विप्लवञ्च वितन्वतः।।७०.२।।

लोभमोहवशीभूतान् कामक्रोधपरायणान्
कुर्यादिमान् रणे चण्डी खड्गधारापथातिथीन्।।७०.३।।

सवैया

ए खल हैं नहिं शुम्भ समान
न हैं महिषासुर सों बलवारे।
ना मधुकैटभ के सम हैं
नहिं चण्ड न मुण्ड समान जुझारे।।
श्रोणित वीर्य समान नहीं
कहै राम गुलाम सुनो जग माँ रे।
धूम्र विलोचन दैत्य समान
हुँकार की अग्नि करै नहिं छारे।।७१।।

न शुम्भवत् खला एते शक्ता न महिषोपमा:
मधुकैटभवन्नैव चण्डमुण्डोर्जिताश्च वा।।७१.१।।

वक्ति रामविधेयोऽमी रक्तबीजसमा नहि
किन्न धूम्राक्षवत् पापान् हुङ्कृत्या त्वं दिधक्षसि।।७१.२।।

कवित्त

खङ्ग चक्र गदा चाप-बाण त्यों परिघशूल
विशद भुसुंडी शीश शंख हैं करन में।
वसन विभूषण सँवारे अंग अंगन में
झुन्न झुन्न शब्द करैं नूपुर चरण में।।
नील गिरि उपल समान मुख कांति जगै
राम को गुलाम कहै प्रबल लरन में।
विधि को बँचायो मधु कैटभ को मारि जौन
मैं हूँ अब अहौं तौनी काली के शरण में।।७२।।

खड्गश्चक्रं गदा चापं सशरं परिघस्तथा
शूलं भुशुण्डिरुच्छीर्षं शङ्खं तव भुजव्रजे।।७२.१।।

वासो-विकस्वरा भूषा प्रत्यङ्गं देवि राजते
तनुतः कलझङ्कारं नूपुरौ पदयोरपि।।७२.२।।

प्रबलं युध्यमानायाः पुण्यं विभ्राजते तव
नीलाचलशिलास्निग्धं दीप्रञ्च मुखमण्डलम्।।७२.३।।

कृतवत्या विधे रक्षां विनाश्य मधुकैटभौ
भवत्याः खल्वहं काल्याः शरणं समुपागतः।।७२.४।।

सवैया

अण्ड कटाह अनेकन में
कल कीरति छाय रही जग तेरी।
संकट में तुमको सुमिरैं
तिनके सब दुःख हरै बिन देरी।।
रामगुलाम करैं विनती
जगदम्ब सुनो करुणा दृग हेरी।
दीन विचारि कै छोह न छाँड़हु
मातु सहाय करौ अब मेरी।।७३।।

समेष्वण्डकटाहेषु ते सुकीर्तिर्विराजते
संकटे च स्मृता सद्यो दुःखव्रातं व्यपोहसि।।७३.१।।

शृणु रामविधेयस्य विनतिं कृपयाऽम्बिके
उपेक्षस्व न दीनं मां शीघ्रं कुरु सहायताम्।।७३.२।।

जागत सोवत बागत बैठत
में रट लागि रही अब तेरी।
आस भरोस है तेरइ अम्ब
तूँ जानति हौ सब के हिय केरी।।
तेरे समान दया को निधान
न दूसर देखि परै दृग हेरी।
रामगुलाम की बेगि करौ सुधि
मातु कलेश हरौ बिन देरी।।७४।।

जाग्रत्स्वापभ्रमिस्थैर्यक्षणेषु रटनं तव
अन्तर्यामिनि विश्रब्धं साभिलाषः करोम्यहम्।।७४.१।।

त्वत्समो न दयाकोषो नेत्रगोचरतां गतः
स्मर रामानुगं मातः क्लेशञ्च हर सत्वरम्।।७४.२।।

कवित्त

काल की करालता करम कठिनाई किधौं
पाप के प्रभाव ते प्रचण्ड शत्रु भये हैं।
छल को बढ़ाय के छकावैं दिन रात मोंहि
जानि वित्तहीन दीन दुःख बहु दये हैं।।
तू है जन-पालिनी प्रचण्ड-शत्रु-घालिनी तू
राम के गुलाम की सुरति क्यों न लये हैं।
दीजै अवलम्ब न विलम्ब कीजै अम्ब अब
दासन के हेतु बाँह ढील कहुँ भये हैं।।७५।।

करालत्वेन कालस्य पापाद् वा कर्मदोषतः
प्रचण्डाः शत्रवो जाता अहोरात्रं छलान्विताः।।७५.१।।


